# MASTER OF ARTS EXAMINATION, 2023

(2nd Year, 2nd Semester)

## SANSKRIT

## COURSE – XVIII / E

## [ LITERARY SOURCES FOR THE STUDY OF ANCIENT INDIAN HISTORY ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

**क–विभागः**

१। अधोलिखितेषु **पञ्च प्रश्नाः** सुरगिरा देवनागर्या लिप्या समाधेयाः।

1×5=5

क) विक्रमाङ्कदेवचरिते चालुक्यवंशस्य आदिपुरुषः क उक्तः? तस्माच्च क उद्भूतः?

ख) द्वितीयतैलस्य पितरौ नामत उल्लेख्यौ। द्वितीयतैलः कस्य नृपस्य सामन्त आसीत् कुत्र च शासनमासीत्तस्य?

ग) कस्माद् उत्तरं प्रथमसोमेश्वरः राज्यं लेभे? उत्तरकाले असौ केन नाम्ना परिचितोऽभवत्? तस्य अपरमपि किं नाम ज्ञायते?

घ) क्षेमेन्द्रस्य सुव्रतस्य च ग्रन्थद्वये कीदृशो दोष आविष्कृतः कल्हणेन?

ङ) कल्हणस्य आदिवासभूमिः कुत्रासीत्? कस्मिन् देवे तस्य निष्ठा ज्ञायते? तस्य पितुर्नाम किमासीत्?

च) कति राजान आम्नायभङ्गवशात् विस्मृता इति कल्हणेनोच्यते?

तेषु नीलमतपुराणात् कति राजानः कल्हणेन प्राप्ताः ?

छ) मिहिरकुलः कल्हणमतेन कस्य पुत्र आसीत् ? वस्तुतस्तु स कस्य पुत्र इति ऐतिहासिकसूत्राद् ज्ञायते ?

२। अधोलिखितेषु **द्वौ प्रश्नौ** समाधेयौ। 5×2=10

क) कस्मात् कालपरिसराद् आरभ्य कल्हणस्य *राजतङ्गिण्याम्* तथ्यादिकं श्रद्धेयत्वम् आप्नोति ? तत्रोपलब्धानां तथ्यानां परीक्षाणार्थं केषाम् आकरान्तराणाम् उपयोगः करणीयः ? कालानुक्रमात्मिका या विच्युतयः *राजतरङ्गिण्याम्* उपलब्धास्तासु तिस्र आलोचनीयाः। 1+1+3=5

ख) षष्ठविक्रमादित्यस्य सामरिककीर्तयो वर्णनीयाः।

ग) चालुक्यानाम् उद्भवम् आश्रित्य *विक्रमाङ्कदेवचरिते* आकरान्तरेषु च ये वृत्तान्ता उपलब्धास्ते समासत उपस्थापनीयाः।

**ख–विभागः**

४। अधोलिखितं **प्रश्नद्वयम्** समाधेयम्। 2.5×2=5

क) *सहसावितरणजितकर्णः* – अत्र पालराजवंशपक्षे पदच्छेदः कर्तव्यः। क आसीत् ? कर्णः ? तेन सह पालान्वयस्य कः संबन्धः ? टीकाकारेणास्य श्लोकांशस्य कीदृशी व्याख्या कृता ?

ख) पालराजवंशस्य उद्भवः *रामचरिते* केन प्रकारेण विवृतः ? आकरान्तरैस्तस्य विवरणस्य कीदृशः प्रभेदो वर्तते ?

५। ऐतिहासिकतात्पर्यं निर्णेयम्।

मांसभुजोच्चैर्दशकेन जनकभूर्दस्युनोपधिव्रतिना।
दिव्याह्वयेन सीतावासालंकृतिरहारि कान्तास्य॥ 5

[ 2 ]

अथवा

*रामचरितम्* आश्रित्य भीमस्य चरितं संहारश्च वर्ण्यताम्।

६। टीका कार्या। 5

वन्द्यः, शूरः, अर्जुनः, भास्करः, विक्रमः।

अथवा

द्वितीयमहीपालस्य चरितं *रामचरित*–दृष्ट्या विचारणीयम्। तस्य *राजप्रवर* इति विशेषणं कथं व्याख्यातुं शक्यते ?